# कथापूर्तिः।

**मञ्जूषातः उचितान् शब्दान् चित्वा रिक्तस्थानानि पूरयित्वा कथां पुनर्लिखत।**
**[टीपः परीक्षेत ५ गुणांसाठी कोणत्याही ५ जागा विचारल्या जातील.]**

१. अस्ति कस्मिंश्चिद् **वने** खरनखरो नाम सिंहः। स कदाचिद् भक्ष्यम् अन्विष्यन् इतश्चेतश्च अभ्राम्यत्। परं न किञ्चिदपि प्राप्तं तेन। अथ **क्षुधया** पीडितः सायं एकां गुहां प्राप्तः। सोऽचिन्तयत् नूनमत्र रात्रौ किमपि सत्त्वम् आगच्छेत्। तन्मम **भोजनं** भविष्यति। ततः स केसरी **गुहां** प्रविश्य निभृतं स्थितः। तस्मिन् तत्र स्थिते निपुणको नाम जम्बूकः समायातः। यावत् स पश्यति तावत् **सिंहस्य** पदचिह्नानि गुहायां प्रविष्टानि तस्य दृष्टिपथं **आयातानि** न पुनर्निष्क्रान्तानि। किंचिद् विचिन्त्य जम्बूकोऽब्रवीत्, हे **गुहे** देहि मे प्रत्युत्तरम्। तत् श्रुत्वा सिंहेन चिन्तितम् अवश्यमेषा गुहा प्रतिदिनं प्रत्युत्तरं ददाति। यदि अद्य न वदति तर्हि मम **आहाराभावः** भवेत्। अतः स **गर्जनां** कृतवान्। तच्छ्रुत्वा मुक्तोऽहं **मरणात्** इति मत्वा हृष्टः जम्बूक सुदूरम् अगच्छत्।

**(शब्दमञ्जूषा** : सिंहस्य, भोजनं, क्षुधया, वने, आहाराभावः, मरणात्, गुहे, गर्जनां, गुहां, आयातानि)

२. आसीत् अङ्गुलिमालः नाम कश्चित् कुख्यातः चोरः। **गहने** अरण्ये स निवसति स्म। पथिकान् लुण्ठयित्वा तेषां अङ्गुलीश्च कर्तयति स्म। तासां मालां कृत्वा कण्ठे धृता तेन तस्मात् तस्य नाम अङ्गुलिमाल इति। **अङ्गुलीनाम्** सहस्रं धारयिष्यामि इति तेन प्रतिज्ञा कृता। कथमपि स ग्रहीतव्यः एतदर्थे राजा प्रयत्नशीलः आसीत्। राज्ञः एते प्रयासाः **पुत्राय** निवेदयितुं तस्य माता अरण्यम् आगच्छत्। प्रतिज्ञापूर्तये **एकस्याः** अङ्गुलेः आवश्यकता आसीत्। तदर्थं स मातरमेव अङ्गुलिकर्तनार्थम् अतर्जयत्। यावदेवासौ अङ्गुलिं कर्तयति **तावत्** प्राप्तस्तत्र भगवान् बुद्धः। स भगवान् अङ्गुलिमालं एकं पर्णम् अयाचत। अङ्गुलिमालः **वृक्षस्य** पर्णं छित्वा भगवते अयच्छत्। ततः भगवता कथितम् अधुना तं **पर्णम्** वृक्षे पुनः स्थापय। अङ्गुलिमाल तत्कर्तुम् असमर्थ आसीत्। क्षमायाचनार्थं स भगवतः **पादयोः** पतितः। बुद्धोपदेशेन तस्य **हृदयम्** परिवर्तितम्। **बुद्धानुयायी** स संजातः।

**(शब्दमञ्जूषा** : बुद्धानुयायी, हृदयम्, पादयोः, गहने, पर्णम्, अङ्गुलीनाम्, वृक्षस्य, तावत्, एकस्याः, पुत्राय)

३. प्रभञ्जनो नाम झञ्झावातः आत्मनः अनुजं मन्दपवनम् अपृच्छत् मत्सदृशः शक्तिमान् भवितुं नेच्छसि किम्। तस्य सा **पृच्छा** अनुत्तरिता एवावर्तत। तदा स्वमाहात्म्यं पुनः एकवारं कथयितुं प्रभञ्जनः प्राह मन्दपवनं, वत्स पश्य, यदाहं वहामि तदा मम आगमनं सुदूरं सूच्यते। **सर्वत्र** वार्ता प्रसरति। **भयभीताः** जनाः इतस्ततो धावन्ति। पशुपक्षिणः अपि संत्रस्ता जायन्ते। सागरः अपि **प्रक्षुब्धः** भवति। पर्वतप्रायाः तरङ्गाः **तस्मिन्** उद्भवन्ति। एतत्सर्वं श्रुत्वा किं न कामयसे मत्सदृशः **भवितुम्**। ततः किमपि अवदन् मन्दपवनः मार्गस्थः अभवत्। अत्रान्तरे **यत्र** स गतः तत्र तरङ्गिताः नद्यः शान्तं प्रवहन्ति स्म। सस्यानि सानन्दं कम्पन्ते स्म। मनुजाः **उत्साहिताः** अभवन्। **खगाः** मन्दं मन्दम् अकूजन्। प्रभञ्जेनेन पृष्टस्य प्रश्नस्य उत्तरं मन्दपवनेन कार्येण **दत्तम्**। एवं सुजनाः अपि न कदापि वृथा जल्पन्ते। कार्येणैव ते वदन्ति।

**(शब्दमञ्जूषा** : दत्तम्, खगाः, यत्र, उत्साहिताः, भवितुम्, सर्वत्र, प्रक्षुब्धः, भयभीताः, तस्मिन्, पृच्छा)

४. द्वौ श्रमणौ हिमालये पर्वतारोहणाद् **अतीव** क्लान्तौ तौ कुत्रचिद् विश्रामं कर्तुम् अतिष्ठताम्। अत्रान्तरे ताभ्यां दृष्टं यदेका **बालिका** स्कन्धेन किमपि भारं वहन्ती दूरतः आरोहणं करोति। यदा **समीपम्** आगता तदा दृष्टं ताभ्यां यत् तस्याः स्कन्धे एकः शिशुः वर्तते इति। अतीव स्नेहार्द्रया **गिरा** एकः ताम् अवदत्। बाले **कुत्र** गन्तव्यम्। तया अङ्गुलिनिर्देशेन दूरस्था कुटी दर्शिता। अन्यःश्रमणः ताम् अब्रवीत् श्रान्तासि ननु। क्षणं विरम। अत्र विश्रामं कुरु। **महान्** ते भारः दृश्यते। **सस्मितं** सा अवोचत्। कुत्रास्ति मम भारः। **प्रियम्** अनुजं वहामि। यदि मया चिरायितं **क्षुधा** तं बाधेत। लघु लघु **मया** गन्तव्यम्। इत्युक्त्वा पुनःतं सुबद्धं कृत्वा सवेगं मार्गक्रमणं सा आरभत।

**(शब्दमञ्जूषा** : मया, अतीव, क्षुधा, बालिका, प्रियम्, सस्मितं, कुत्र, गिरा, समीपम्, महान्)

५. अस्ति हेमाङ्गदे देशे राजपुरं नाम **नगरम्**। तत्र जीवंधरो नाम कोऽपि **दयाशीलो** राजपुत्रोऽभवत्। एकदा प्रवृत्ते मधुमासे जीवंधरकुमारः **वयस्यैः** सह जलक्रीडां कर्तुं नदीं गतः। तत्र आसन्नमरणःकोऽपि **कुक्कुरः** तस्य दृष्टिमागतः। केनापि **निर्दयेन** भृशं ताडितः सः रुधिरप्लावितः तत्र पतितः करुणम् आक्रोशति स्म। भूतानुकम्पी राजकुमारः बहु दुःखितः। तत्समीपम् **आगत्य** करतलेन परामृशन् करुणस्वरेण कुमारः अभाषत, 'भद्र **केन** निर्दयेन नराधमेन मारितोऽसि। भवतु यथाशक्ति लघूकरोमि ते दुःखम्। इत्युक्त्वा कुक्कुरं समाश्वासयितुं भृशं **प्रायतत**। हस्तेन जलमानीय तमपाययत्। तथा च सानुक्रोशं भगवन्तं **प्रार्थ्य** तत्कर्णे मूलमन्त्रमुपदिष्टवान्। तस्य मन्त्रसामर्थ्येन स सारमेयः शान्तः सद्गतिं च गतः। अहो **भूतदया** महानुभावस्य।

(**शब्दमञ्जूषा** : प्रार्थ्य, वयस्यैः, दयाशीलो, नगरम्, केन, आगत्य, कुक्कुरः, भूतदया, निर्दयेन, प्रायतत)

६. शब्दानां माधुर्यं स्वर्गं प्रापयति **कटुता** च नरके पातयति। एक एव शब्दः जीवनं **विभूषयेत्** उतान्यः शब्दः जीवनं नाशयेत्। एकदा द्वयोः धनिनोः मध्ये **विवादः** उत्पन्नः। तौ **न्यायालयं** गतौ। तयोरेकः अचिन्तयदहं लक्षं रूप्यकाणि **स्यूते** स्थापयित्वा न्यायाधीशस्य गृहं गतवान्। न्यायाधीशस्तस्य **मन्तव्यं** ज्ञात्वा क्रुद्धोऽभवत्। धनिकोऽवदत् भोः, मत्सदृशाः लक्षरूप्यकाणां **दातारः** दुर्लभाः एव। न्यायाधीशः अवदत् लक्षरूप्यकाणां दातारः कदाचिदन्येऽपि भवेयुः परं लक्षरूप्यकाणां **निराकर्तारः** मत्सदृशाः अन्ये विरला एव। अतः कृपया गच्छतु। न्यायस्थानं **मलिनं** मा कुरु। लज्जितः धनिकः धनस्यूतं **गृहीत्वा** ततः निर्गतः।

(**शब्दमञ्जूषा** : दातारः, स्यूते, कटुता, मलिनं, मन्तव्यं, विवादः, विभूषयेत्, निराकर्तारः, गृहीत्वा, न्यायालयं)

७. अस्ति नर्मदातीरे पर्वतोपत्यकायां **विशालः** शाल्मलीतरुः। तत्र निर्मितेषु **नीडेषु** पक्षिणः वर्षास्वपि सुखेन निवसन्ति। अथैकदा धारासारैर्महती **वृष्टिः** बभूव। तदा तरुतले अवस्थितान् शीतार्तान् **कम्पमानान्** वानरानवलोक्य पक्षिभिरुक्तम् अस्माभिश्चञ्चुभिस्तृणानि **आहृत्य** नीडाः निर्मिताः। यूयं हस्तपादादिसंयुताः अपि किमवसीदथ। तच्छ्रुत्वा वानराः **क्रुद्धाः**। तैरालोचितम् एते नीडास्थिताः **सुखिनः** पक्षिणः अस्मान् निन्दन्ति। तद् भवतु वृष्टेः उपशमः। **शान्ते** पानीयवर्षे तैर्वानरैः वृक्षमारूह्य सर्वे **नीडाः** भग्नाः पक्षिणामण्डानि च अधः पातितानि। अत उच्यते उपदेशो हि मूर्खाणां **प्रकोपाय** न शान्तये।

(**शब्दमञ्जूषा** : प्रकोपाय, नीडेषु, वृष्टिः, शान्ते, क्रुद्धाः, आहृत्य, नीडाः, सुखिनः, कम्पमानान्, विशालः)

८. अद्यत्वे हॉकीक्रीडा जनानां **लोकप्रिया** क्रीडा वर्तते। शतमीटरपरिमिते विशाले **क्रीडाङ्गणे** एकस्मिन् पक्षे एकादशक्रीडकानाम् अपरस्मिन् पक्षे च **एकादशक्रीडकानाम्**, इतस्ततः धावतां दृश्यम् अतीव मनोहारि। यदा निपुणक्रीडकेन नीयमानः कन्दुकः परपक्षगोले **प्रविशति** तदा दर्शकाः करतलध्वनिं कुर्वन्तः **विजयिपक्षस्य** उत्साहं वर्धयन्ति। यः दलः अधिकान् **गोलकान्** करोति स विजयी भवति। **आकाशवाणीयन्त्रात्** हॉकीप्रतियोगितानां समाचारान् अनेके जनाः शृण्वन्ति अथ च दूरदर्शनयन्त्रेभ्योऽपि लक्षशः **दर्शकाः** क्रीडकानां खेलचातुर्यं **दृष्ट्वा** प्रसीदन्ति। हॉकीक्रीडा भारतीयानां राष्ट्रिया क्रीडा। भारतेन ऑलिम्पिकप्रतियोगितासु स्वर्णपदकं **लब्धम्**।

(**शब्दमञ्जूषा** : दृष्ट्वा, आकाशवाणीयन्त्रात्, लोकप्रिया, एकादशक्रीडकानाम्, विजयिपक्षस्य, लब्धम्, प्रविशति, क्रीडाङ्गणे, गोलकान्, दर्शकाः)

९. यथा शरत्पूर्णिमा प्रकाशेन विशिष्यते सर्वासु रात्रिषु तथैव कार्तिकमासस्य अमावस्या **तिमिरेण** विशिष्यते **सर्वासु** रजनीषु। **अस्याम्** रात्रौ स्वर्गायते खलु भूलोकः। स्थाने स्थाने प्रज्वालिताः दीपाः **विलसन्ति**। श्रूयते यदस्मिन् दिने पुरा श्रीरामचन्द्रः रावणं **हत्वा** अयोध्यावासिभिः गृहाणि रथ्याः **राजमार्गाः** च परिमार्जिताः। पताकाभिः तोरणैः अलङ्कृताः। एषः हर्षोत्सवः **अनेन** रूपेण एव रूढः सञ्जातः। लक्ष्मीपूजा इति अपरः विशेषः अस्य **दिवसस्य**। अस्मिन्नेव दिने बलिना बन्दीकृता लक्ष्मीः भगवता **मोचिता**। अतः एव अस्मिन् दिने लक्ष्मीपूजनं क्रियते येन मुक्ता लक्ष्मी अस्माकं **गृहम्** आगच्छेत्।

(**शब्दमञ्जूषा** : विलसन्ति, मोचिता, राजमार्गाः, सर्वासु, हत्वा, गृहम्, अस्याम्, दिवसस्य, तिमिरेण, अनेन)